श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ एकोनचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनचत्वारिंशः सर्गः ॥

**राज्ञो दशरथस्य विलापस्तदाज्ञया सुमन्त्रेण श्रीरामस्य कृते रथस्यानयनं कोषाध्यक्षेण सीतायै बहुमूल्यवस्त्राभूषणानां समर्पणं कौसल्यायाः सीतां प्रति पतिसेवाया उपदेशः, सीतया तस्याङ्गीकरणं श्रीरामस्य मातरं प्रति राज्ञि दोषदृष्टिं परित्यक्तुमनुरोधोऽन्या मातॄश्च सम्बोध्य वनं गन्तुमनुज्ञाप्रार्थनं च**

रामस्य तु वचः श्रुत्वा मुनिवेषधरं च तम्।
समीक्ष्य सह भार्याभी राजा विगतचेतनः॥ **2.39.1** ॥

नैनं दुःखेन सन्तप्तः प्रत्यवैक्षत राघवम्।
न चैनमभिसम्प्रेक्ष्य प्रत्यभाषत दुर्मनाः॥ **2.39.2** ॥

स मुहूर्तमिवासंज्ञो दुःखितश्च महीपतिः।
विललाप महाबाहू राममेवानुचिन्तयन्॥ **2.39.3** ॥

मन्ये खलु मया पूर्वं विवत्सा बहवः कृताः।
प्राणिनो हिंसिता वापि तन्मामिदमुपस्थितम्॥ **2.39.4** ॥

न त्वेवानागते काले देहाच्च्यवति जीवितम्।
कैकेय्या क्लिश्यमानस्य मृत्युर्मम न विद्यते॥ **2.39.5** ॥

योऽहं पावकसङ्काशं पश्यामि पुरतः स्थितम्।
विहाय वसने सूक्ष्मे तापसाच्छादमात्मजम्॥ **2.39.6** ॥

एकस्याः खलु कैकेय्याः कतेऽयं खिद्यते जनः।
स्वार्थे प्रयतमानायाः संश्रित्य निकृतिं त्विमाम्॥ **2.39.7**॥

एवमुक्त्वा तु वचनं बाष्पेण विहतेन्द्रियः।
रामेति सकृदेवोक्त्वा व्याहर्तुं न शशाक सः॥ **2.39.8**॥

संज्ञां तु प्रतिलभ्यैव मुहूर्तात् स महीपतिः।
नेत्राभ्यामश्रुपूर्णाभ्यां सुमन्त्रमिदमब्रवीत्॥ **2.39.9**॥

औपवाह्यं रथं युक्त्वा त्वमायाहि हयोत्तमैः।
प्रापयैनं महाभागमितो जनपदात् परम्॥ **2.39.10**॥

एवं मन्ये गुणवतां गुणानां फलमुच्यते।
पित्रा मात्रा च यत्साधुर्वीरो निर्वास्यते वनम्॥ **2.39.11**॥

राज्ञो वचनमाज्ञाय सुमन्त्रः शीघ्रविक्रमः।
योजयित्वा ययौ तत्र रथमश्वैरलङ्कृतम्॥ **2.39.12**॥

तं रथं राजपुत्राय सूतः कनकभूषितम्।
आचचक्षेऽञ्जलिं कृत्वा युक्तं परमवाजिभिः॥ **2.39.13**॥

राजा सत्वरमाहूय व्यापृतं वित्तसञ्चये।
उवाच देशकालज्ञो निश्चितं सर्वतः शुचिः॥ **2.39.14**॥

वासांसि च वरार्हाणि भूषणानि महान्ति च।
वर्षाण्येतानि सङ्ख्याय वैदेह्याः क्षिप्रमानय॥ **2.39.15**॥

नरेन्द्रेणैवमुक्तस्तु गत्वा कोशगृहं ततः।
प्रायच्छत् सर्वमाहृत्य सीतायै क्षिप्रमेव तत्॥ **2.39.16**॥

सा सुजाता सुजातानि वैदेही प्रस्थिता वनम्।
भूषयामास गात्राणि तैर्विचित्रैर्विभूषणैः॥ **2.39.17**॥

व्यराजयत वैदेही वेश्म तत् सुविभूषिता।
उद्यतोंऽशुमतः काले खं प्रभेव विवस्वतः॥ **2.39.18** ॥

तां भुजाभ्यां परिष्वज्य श्वश्रूर्वचनमब्रवीत्।
अनाचरन्तीं कृपणं मूर्ध्न्युपाघ्राय मैथिलीम्॥ **2.39.19** ॥

असत्यः सर्वलोकेऽस्मिन् सततं सत्कृताः प्रियैः।
भर्तारं नानुमन्यन्ते विनिपातगतं स्त्रियः॥ **2.39.20** ॥

एष स्वभावो नारीणामनुभूय पुरा सुखम्।
अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि॥ **2.39.21** ॥

असत्यशीला विकृता दुर्गा अहृदयाः सदा।
असत्यः पापसङ्कल्पाः क्षणमात्रविरागिणः॥ **2.39.22** ॥

न कुलं न कृतं विद्या न दत्तं नापि सङ्ग्रहः।
स्त्रीणां गृह्णाति हृदयमनित्यहृदया हि ताः॥ **2.39.23** ॥

साध्वीनां तु स्थितानां तु शीले सत्ये श्रुते स्थिते।
स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते॥ **2.39.24** ॥

स त्वया नावमन्तव्यः पुत्रः प्रव्राजितो वनम्।
तव देवसमस्त्वेष निर्धनः सधनोऽपि वा॥ **2.39.25** ॥

विज्ञाय वचनं सीता तस्या धर्मार्थसंहितम्।
कृत्वाञ्जलिमुवाचेदं श्वश्रूमभिमुखे स्थिता॥ **2.39.26** ॥

करिष्ये सर्वमेवाहमार्या यदनुशास्ति माम्।
अभिज्ञास्मि यथा भर्तुर्वर्तितव्यं श्रुतं च मे॥ **2.39.27** ॥

न मामसज्जनेनार्या समानयितुमर्हति।
धर्माद् विचलितुं नाहमलं चन्द्रादिव प्रभा॥ **2.39.28** ॥

नातन्त्री वाद्यते वीणा नाचक्रो विद्यते रथः।
नापतिः सुखमेधेत या स्यादपि शतात्मजा ॥ **2.39.29** ॥

मितं ददाति हि पिता मितं भ्राता मितं सुतः।
अमितस्य तु दातारं भर्तारं का न पूजयेत् ॥ **2.39.30** ॥

साहमेवङ्गता श्रेष्ठा श्रुतधर्मपरावरा।
आर्ये किमवमन्येयं स्त्रिया भर्ता हि दैवतम् ॥ **2.39.31** ॥

सीताया वचनं श्रुत्वा कौसल्या हृदयङ्गमम्।
शुद्धसत्त्वा मुमोचाश्रु सहसा दुःखहर्षजम् ॥ **2.39.32** ॥

तां प्राञ्जलिरभिप्रेक्ष्य मातृमध्येऽतिसत्कृताम्।
रामः परमधर्मात्मा मातरं वाक्यमब्रवीत् ॥ **2.39.33** ॥

अम्ब मा दुःखिता भूत्वा पश्येस्त्वं पितरं मम।
क्षयोऽपि वनवासस्य क्षिप्रमेव भविष्यति ॥ **2.39.34** ॥

सुप्तायास्ते गमिष्यन्ति नव वर्षाणि पञ्च च।
समग्रमिह सम्प्राप्तं मां द्रक्ष्यसि सुहृद्वृतम् ॥ **2.39.35** ॥

एतावदभिनीतार्थमुक्त्वा स जननीं वचः।
त्रयः शतशतार्धा हि ददर्शावेक्ष्य मातरः ॥ **2.39.36** ॥

ताश्चापि स तथैवार्ता मातृर्दशरथात्मजः।
धर्मयुक्तमिदं वाक्यं निजगाद कृताञ्जलिः ॥ **2.39.37** ॥

संवासात् परुषं किञ्चिदज्ञानादपि यत् कृतम्।
तन्मे समुपजानीत सर्वाश्चामन्त्रयामि वः ॥ **2.39.38** ॥

वचनं राघवस्यैतद् धर्मयुक्तं समाहितम्।
शुश्रुवुस्ताः स्त्रियः सर्वाः शोकोपहतचेतसः ॥ **2.39.39** ॥

जज्ञेऽथ तासां सन्नादः क्रौञ्चीनामिव निःस्वनः।
मानवेन्द्रस्य भार्याणामेवं वदति राघवे॥ **2.39.40**॥

मुरजपणवमेघघोषवद्
    दशरथवेश्म बभूव यत् पुरा।
विलपितपरिदेवनाकुलं
    व्यसनगतं तदभूत् सुदुःखितम्॥ **2.39.41**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे एकोनचत्वारिंशः सर्गः॥